# सुन्दरकाण्ड चतुर्विंशः सर्गः (२४) - राक्शसी तर्जणम्

ततः सीता मुपागम्य राक्षस्यो विकृताननाः ।
परुषं परुषा नार्य ऊचुस्तां वाक्य मप्रियम् ॥ १ ॥

किं त्वमन्तःपुरे सीते सर्व भूत मनोहरे ।
महार्ह शयनोपेते न वासमनु मन्यसे ॥ २ ॥

मानुषी मानुषस्यैव भार्यात्वं बहु मन्यसे ।
प्रत्याहर मनो रामान् न त्वं जातु भविष्यसि ॥ ३ ॥

त्रैलोक्य वसु भोक्तारं रावणं राक्षसेश्वरम् ।
भर्तार मुपसङ्गम्य विहरस्व यथासुखम् ॥ ४ ॥

मानुषी मानुषं तं तु राममिच्छसि शोभने ।
राज्याद् भ्रष्ट मसिद्धार्थं विक्लवं त्वमनिन्दिते ॥ ५ ॥

राक्षसीनां वचः श्रुत्वा सीता पद्म निभेक्षणा ।
नेत्राभ्या मश्रु पूर्णाभ्या मिदं वचन मब्रवीत् ॥ ६ ॥

यदिदं लोक विद्विष्ट मुदाहरथ सङ्गताः ।
नैतन् मनसि वाक्यं मे किल्बिषं प्रतिभाति वः ॥ ७ ॥

न मानुषी राक्षसस्य भार्या भवितु मर्हति ।
कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ८ ॥

दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः ।
तं नित्य मनुरक्ताऽस्मि यथा सूर्यं सुवर्चला ॥ ९ ॥

यथा शची महाभागा शक्रं समुपतिष्ठति ।
अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा ॥ १० ॥

लोपामुद्रा यथागस्त्यं सुकन्या च्यवनं यथा ।
सावित्री सत्यवन्तं च कपिलं श्रीमती यथा ॥ ११ ॥

सौदासं मदयन्तीव केशिनी सगरं यथा ।
नैषधं दमयन्तीव भैमी पति मनुव्रता ॥ १२ ॥

तथाह मिक्ष्वाकु वरं रामं पति मनुव्रता ।
सीताया वचनं श्रुत्वा राक्षस्यः क्रोध मूर्छिताः ॥ १३ ॥

भर्त्सयन्ति स्म परुषैर् वाक्यै रावण चोदिताः ।
अवलीनः स निर्वाक्यो हनुमान् शिंशुपा द्रुमे ॥ १४ ॥

सीतां सन्तर्जयन्तीस् ताराक्षसी रशृणोत्कपिः ।
तामभिक्रम्य सङ्क्रुद्धा वेपमानां समन्ततः ॥ १५ ॥

भृशं संलिलिहुर् दीप्तान् प्रलम्बान् दशनच्छदान् ।
ऊचुश्च परम क्रुद्धाः प्रगृह्याशु परश्वधान् ॥ १६ ॥

नेय मर्हति भर्तारं रावणं राक्ष साधिपम् ।
सम्भर्त्स्यमाना भीमाभी राक्षसीभिर् वरानना ॥ १७ ॥

सा बाष्प मुप मार्जन्ती शिंशुपां तामुपागमत् ।
ततस्तां शिंशुपां सीता राक्षसीभिः समावृता ॥ १८ ॥

अभिगम्य विशालाक्षी तस्थौ शोक परिप्लुता ।
तां कृशां दीनवदनां मलिनाम्बर धारिणीम् ॥ १९ ॥

भर्त्सयां  चक्रिरे सीतां राक्षस्यस् ताः समन्ततः ।
ततस्तां विनता नाम राक्षसी भीम दर्शना ॥ २० ॥

अब्रवीत् कुपिताकारा कराला निर्णतोदरी ।
सीते पर्याप्त मेतावद् भर्तुः स्नेहो निदर्शितः ॥ २१ ॥

सर्वत्राति कृतं भद्रे व्यसनायोप कल्पते ।
परितुष्टास्मि भद्रं ते मानुषस्ते कृतो विधिः ॥ २२ ॥

ममापि तु वचः पथ्यं ब्रुवन्त्याः कुरु मैथिलि ।
रावणं भज भर्तारं भर्तारं सर्व रक्षसाम् ॥ २३ ॥

विक्रान्तं रूपवन्तं च सुरेशमिव वासवम् ।
दक्षिणं त्याग शीलं च सर्वस्य प्रिय दर्शनम् ॥ २४ ॥

मानुषं कृपणं रामं त्यक्त्वा रावण माश्रय ।
दिव्याङ्ग रागा वैदेहि दिव्या भरण भूषिता ॥ २५ ॥

अद्य प्रभृति सर्वेषां लोकाना मीश्वरी भव ।
अग्नेः स्वाहा यथा देवी शचीवेन्द्रस्य शोभने ॥ २६ ॥

किं ते रामेण वैदेहि कृपणेन गतायुषा ।
एतदुक्तं च मे वाक्यं यदि त्वं न करिष्यसि ॥ २७ ॥

अस्मिन् मुहूर्ते सर्वास्त्वां भक्षयिष्यामहे वयम् ।
अन्या तु विकटा नाम लम्बमान पयोधरा ॥ २८ ॥

अब्रवीत् कुपिता सीतां मुष्टि मुद्यम्य गर्जती ।
बहून् यप्रिय रूपाणि वचनानि सुदुर्मते ॥ २९ ॥

अनुक्रोशान् मृदुत्वाच्च सोढानि तव मैथिलि ।
न च नः कुरुषे वाक्यं हितं काल पुरःसरम् ॥ ३० ॥

आनीतासि समुद्रस्य पारमन्यैर् दुरासदम् ।
रावणान्तःपुरं घोरं प्रविष्टा चासि मैथिलि ॥ ३१ ॥

रावणस्य गृहे रुद्धा मस्माभिस्तु सुरक्षिताम् ।
न त्वां शक्तः परित्रातु मपि साक्षात् पुरन्दरः ॥ ३२ ॥

कुरुष्व हित वादिन्या वचनं मम मैथिलि ।
अलमश्रु प्रपातेन त्यज शोक मनर्थकम् ॥ ३३ ॥

भज प्रीतिं प्रहर्षं च त्यजैतां नित्य दैन्यताम् ।
सीते राक्षस राजेन सह क्रीड यथा सुखम् ॥ ३४ ॥

जानासि हि यथा भीरु स्त्रीणां यौवन मध्रुवम् ।
यावन्न ते व्यतिक्रामेत् तावत् सुख मवाप्नुहि ॥ ३५ ॥

उद्यानानि च रम्याणि पर्वतो पवनानि च ।
सह राक्षस राजेन चर त्वं मदिरेक्षणे ॥ ३६ ॥

स्त्री सहस्राणि ते सप्त वशे स्थास्यन्ति सुन्दरि ।
रावणं भज भर्तारं भर्तारं सर्व रक्षसाम् ॥ ३७ ॥

उत्पाट्य वा ते हृदयं भक्षयिष्यामि मैथिलि ।
यदि मे व्याहृतं वाक्यं न यथावत् करिष्यसि ॥ ३८ ॥

ततश् चण्डोदरी नाम राक्षसी क्रोध मूर्छिता ।
भ्रामयन्ती महच्छूल मिदं वचन मब्रवीत् ॥ ३९ ॥

इमां हरिण लोलाक्षीं त्रासोत् कम्पि पयोधराम् ।
रावणेन हृतां दृष्ट्वा दौर्हृदो मे महानभूत् ॥ ४० ॥

यकृत् प्लिह मथोत्पीडं हृदयं च सबन्धनम् ।
अन्त्राण्यपि तथा शीर्षं खादेय मिति मे मतिः ॥ ४१ ॥

ततस्तु प्रघसा नाम राक्षसी वाक्य मब्रवीत् ।
कण्ठमस्या नृशंसायाः पीडयाम किमास्यते ॥ ४२ ॥

निवेद्यतां ततो राज्ञे मानुषी सा मृतेति ह ।
नात्र कश्चन सन्देहः खादतेति स वक्ष्यति ॥ ४३ ॥

ततस् त्वजामुखी नाम राक्षसी वाक्य मब्रवीत् ।
विशस्येमां ततः सर्वाः समान् कुरुत पीलुकान् ॥ ४४ ॥

विभजाम ततः सर्वा विवादो मे न रोचते ।
पेयमानीयतां क्षिप्रं लेह्य मुच्चावचं बहु ॥ ४५ ॥

ततः शूर्पणखा नाम राक्षसी वाक्य मब्रवीत् ।
अजामुख्या यदुक्तं हि तदेव मम रोचते ॥ ४६ ॥

सुरा चानीयतां क्षिप्रं सर्वशोक विनाशिनी ।
मानुषं मांस मास्वाद्य नृत्यामोऽथ निकुम्भिलाम् ॥ ४७ ॥

एवं सम्भर्त्स्य माना सा सीता सुरसुतोपमा ।
राक्षसीभिः सुघोराभिर् धैर्य मुत्सृज्य रोदिति ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥